M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 1400

Title: Nyaya-Vrtti Shandilya

1400

M Complete

Nyaya Work of Sivaditya	Title
	Author
	Editor
	Year, Vols.
	Publisher
1400	Remarks

[illegible]तानि[illegible]विशिष्टत्वाभि[illegible]ति येन न्यसेतदा वह्नित्वावच्छिन्ना वह्नित्वप्रकारतानिरूपितविशेष्य
ता[illegible]प्रकारतैव प्रतिबध्यतावच्छेदका[illegible]नीया तत्रैव न काप्यनुपपत्तिः अथैतादृशविषयिताया प्रतिबध्यतावच्छे
दकत्वे नाहार्यस्य विशिष्टवैशिष्ट्यबोधस्य तद्प्रतिबध्यत्वप्रसंगः वह्नित्वावच्छिन्नवह्नित्वप्रकारतानिरूपितविशेष्यत्वा
भि[illegible]प्रकारताशालिबोधे वह्नित्वप्रकारकज्ञानस्य प्रतिबंधकत्वकल्पनाद्विशिष्टवैशिष्ट्यबोधस्य तादृशप्रकारताशालित्वा
[illegible]त् तादृशप्रतिबध्यप्रतिबंधकभावकल्पने निष्प्रयोजनकमिति तु नाशंकनीयं तत्कल्पने वह्नित्वप्रकारकज्ञाने
[illegible]विरोधिसामग्री[illegible]विशेष्ये विशेषणमिति रीत्या तादृशबोधं प्रति प्रतिबंधकत्वकल्पनेन लाघवात् न च तादृशवि
[illegible]सामग्रीकाले वह्नित्वविशिष्टवैशिष्ट्यबोधवारणाय तत्र तत्प्रतिबंधकत्वकल्पनीयेऽभयस्याधारणे वह्नित्वप्रकार
तानिरूपितविशेष्यताभिन्नप्रकारताशालित्वमेव प्रतिबध्यतावच्छेदकमुपेयमेतत्याच तादृशप्रतिबंधकतयैवोपपत्तेः
विशेष्ये विशेषणमिति रीत्या बोधे तादृशसामग्रीणां पृथक् प्रतिबंधकत्वकल्पनस्य प्रसक्तिरेव नास्तीति वाच्यं विशिष्ट
वैशिष्ट्यबोधो जायतां विशेष्ये विशेषणमिति रीत्या बोधो जायतामित्येतादृशेच्छानां पृथक् पृथगुत्तेजकत्वानुरोधेन पृथक्
प्रतिबंधकता कल्पनस्यावश्यकत्वादिति चेत्तर्हि विशिष्टवैशिष्ट्यबोधत्वस्यैव तदभावव्याप्यवत्ताज्ञानत्वादिप्रतिबध्यता
वच्छेदकत्वमुपेयते आहार्यं तु विशेष्ये विशेषणमिति रीत्यैव जायते तदभावव्याप्यवत्तादशायां तु निर्विकल्पको[illegible]
दृशसामग्रीवशाद्वह्निमान्पर्वत इत्याकारकं प्रत्यक्षं जायते तादृशसामग्रीवशान्न तथाविधप्रत्यक्षापत्तिः[illegible]भवति[illegible]
प्रकारकज्ञानाभावस्यापि तत्सामग्रीघटकत्वात् तदभावव्याप्यवत्ताज्ञानादिदशायां वनिगमनत्वात् तादृशज्ञानसत्त्वेन तथा

विधज्ञानसामग्र्या एवाभावात्· वस्तुतस्तु वह्नित्वविशिष्टवैशिष्ट्यबोधे प्रतिवह्नित्वप्रकारकज्ञाननियतविशेषिसामग्र्या
उभयविधबोधसाधारणोपदर्शितधर्मे प्रतिबध्यतावच्छेदकीकृत्यैकप्रतिबध्यकत्वमेव शक्यते कल्पयितुं विशिष्टवैशि
ष्ट्यबोधे ज्ञाततां विशेष्ये विशेषणमिति रीत्या बोधो जायतामित्याकारकेच्छयोरेकत्रोत्तेजकत्वे ऽक्षतिविरहात्· न हि तयो
रेकत्रोत्तेजकत्वे तादृशसामग्रीदशायां विशिष्टवैशिष्ट्यबोधत्वप्रकारकेच्छासत्त्वे विशेषणतावच्छेदकप्रकारकज्ञानास
त्त्वे विशेष्ये विशेषणमिति रीत्या तादृशप्रत्यक्षस्याप्यापत्तिरिति संभवति वह्नित्वप्रकारकज्ञानसामग्रीदशायां विशेषणा
तावच्छेदकप्रकारकज्ञानस्यावश्यंसत्त्वात्· न वापत्तिविरहेपि तादृशेच्छयोरेकत्रोत्तेजकत्वे एकत्रैव नेच्छाभावयोर्निवे
शात्तयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरह इति वाच्यं· तादृशेच्छयोर्वह्नित्वप्रकारतानिरूपितविशेष्यत्वाभिन्न
प्रकारकत्वप्रकारकेच्छात्वेनानुगमय्योत्तेजकत्वोपगमाद्भावद्वयस्यैवानिवेशात्तथा न विशेष्ये विशेषणमिति रीत्या
बोधे विशेषणतावच्छेदकप्रकारकज्ञानप्रतिबन्धकतायाः [illegible]
तादृशविषयतायाः प्रतिबध्यतावच्छेदकत्वे पुनः कादिदप्यनुपपत्तिरिति। अथ विशेष्ये विशेषणमिति रीत्या नद्विशिष्टबुद्धित्वेस्य तदभाव
व्याप्यवत्तानिर्णयादिप्रतिबध्यतावच्छेदकत्वोपगमे तदभावव्याप्यवत्तानिर्णयादिदशायां मिथ्यासत्त्वे वनदसत्त्वे दिविशिष्टवैशि
ष्ट्यावगाहिप्रत्यक्षप्रसंगः न च विशिष्टारोपे दोषाहेतुत्वोपगमान्न व्यभिचार इति वाच्यम्· इच्छाजितापितदभावव्याप्यवत्ता
ज्ञानशून्यकाले विशिष्टवैशिष्ट्यबोधोदयेनेच्छाया हेतुत्वेस्यैव कल्पयितुमशक्यत्वादिति चेन्न· वह्नित्वानवच्छिन्नप्रकारताक
त्ववह्नित्वावच्छिन्नप्रकारताशालिबाधबुद्ध्यवच्छिन्ने प्रतिवह्नित्वावच्छिन्नप्रकारकबाधबुद्ध्यनेवेच्छात्वादिना हेतुताक

शिव· १०

स्यानेतदभावव्याप्यवत्तानिर्णयादिशून्यकालीनवह्नित्वविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षस्य वह्निविधविषयताशालिबाधबुद्धित्वेन व
ह्नित्वावच्छिन्नप्रकारताशून्यत्वाभावान्न व्यभिचारः इत्थं च तदभावव्याप्यवत्तानिर्णयकाले ऽप्यभिचारो तादृशप्रकारता
शून्यतयापि धूमस्य वह्निरूपकारणविरहात्तादृशप्रकारताशालितथाविधबोधस्य तदभावव्याप्यवत्तानिर्णयाभावादि
रूपकारणविरहादन्यविधतथाविधबोधस्य वाङ्गीकृतया नापादनं संभवतीति· स्यादेतत्· एवमप्युभयव्याप्यवत्ताज्ञा
नदशायां विशिष्टवैशिष्ट्यावगाहिन्यां संशयानुमितौ न किंचिद्बाधकमीक्षामहे· उभयवह्नित्वानवच्छिन्नत्वादिप्र
कारताशालिन्यां विशिष्टवैशिष्ट्यबोधात्मिकायामनुमितेस्तदभावव्याप्यवत्तानिर्णयादिप्रतिबध्यतया·न्यादृश्याश्चा
ङ्गीकरणमानापत्तिरिति वन्नाभिप्रायमवगतवान् किं यतो न वयं संशयानुमितिमापादयामः किं तूभयव्याप्यवत्ताज्ञानका
ले शुद्धवह्नित्वादिविशिष्टप्रकारताकसंशयानुमितिमंगीकुर्वतां मते बाधकं पश्यामः न च तत्र साध्यकाभावस्य बाध
करतिवाच्यं· प्रत्येकमुभयकोट्योरनुमितिसामग्र्या एव साध्यकत्वात्· अनुमितिप्रयोजकीभूतपरामर्शादिघटितसाम
ग्र्या ऐप्रयोजनविरहेण तदभावव्याप्यवत्तानिर्णयाभावस्यानिवेशेन तत्प्रयोजकीभूतसामग्र्या उभयव्याप्यवत्ता
ज्ञानकाले ऽप्यक्षतत्वात्· न च तदभावव्याप्यवत्ताज्ञानाभावस्य सामग्रीव्याप्तावनिवेशे ऽन्वयव्यभिचारसंदेहः उभयव्या
प्यवत्ताज्ञानदशायामनुमितेः संदिग्धत्वादिति तन्निवेशनमावश्यकमिति वाच्यं· अन्वयव्यभिचारसंदेहस्यादोषत्वा
त्· नैवमपि उभयव्याप्यवत्ताज्ञानकाले केवलविशिष्टवैशिष्ट्यविषयताशालिसंशयानुमितेरुपगमे बाधकालेपि ता
दृशानुमित्यापत्तिः आहार्यप्रत्यक्षे व्यभिचारवारणाय बाधबुद्धिप्रतिबध्यतावच्छेदककोटावपि वह्नित्वाद्यन
वच्छिन्नप्रकारताया एव निवेशनीयतया तादृशानुमितेस्तद्प्रतिबध्यत्वादित्यनुमितौ बाधबुद्धेः प्रतिबंधकत्व

तत्संशयानुमितिमंगीकुर्वाणेनोपगंतव्यमिति तदनभ्युपगमएवसमीचीनः। यत्तुविरोधिसामग्रीकालेविशिष्टवैशिष्ट्यबोधत्वप्रकारके
च्छावलाघानुमितिरुत्पद्यते वन्हित्वाघनवच्छिन्नप्रकारतायास्तत्साधारण्येनसंभवतितादृशप्रकारशालिन्यामनुमितौविशेष्ये
विशेषणमितिरीत्याऽनुमितिर्जायतामित्येतादृशेच्छाविरहविशिष्टविरोधिसामग्र्याः प्रतिबंधकत्वात्प्रकृतेचतादृशप्रतिबंधक
सत्वात्एवंचोभयव्याप्यवत्ताज्ञानकालेतथाविधप्रकारताशून्यसंशयानुमितिरुत्पद्यतएवेति। तदसत्। विशेष्येविशेषणमिति
न्यायेनानुमितौतथाविधानुमित्साद्वयमुत्तेजकीकृत्यैवविरोधिसामग्र्याः प्रतिबंधकत्वकल्पनाद्विशिष्टवैशिष्ट्यबोधत्वप्रका
रकेच्छाधीनानुमितेरपितथाविधप्रकारताशालित्वसंभवात्। उभयेच्छयोरेकत्रोत्तेजकत्वेविशिष्टवैशिष्ट्यबोधत्वप्रकारकेच्छाकाले
विशेषणतावच्छेदकप्रकारकज्ञानासत्वेकेवलविशेष्येविशेषणमितिन्यायेनानुमितिप्रसंगइतितुनसंभवद्युक्तिकम्। पर्वतो
वन्हिमानित्याकारकानुमितिसामग्रीकालेवन्हित्वादिविशिष्टवैशिष्ट्यबोधजनकीभूतवन्हित्वादिरूपविशेषणतावच्छे
दकज्ञानस्यनियमतःसत्वात्। प्रागुपदर्शितेनानुगतरूपेणत्वद्वयोरुत्तेजकत्वोपगमान्नाभावद्वयस्यविशेषणविशेष्यभा
वेविनिगमनाविरहेणप्रतिबंधकताद्वैविध्यमाशंकितव्यमित्याहुः॥ अत्रेदंचिंतनीयं। पर्वतोवन्हिमानित्यादिकेप्रतिवन्हि
त्वादिप्रकारकज्ञाननियतानामिच्छाविशिष्टवन्हिमन्महानसमित्याकारकशाब्दबोधसामग्रीणांप्रतिबंधकतामपीच्छो
त्तेजकत्वंनोपेयते किंतुवन्हित्वाघनवच्छिन्नवन्हित्वप्रकारतैवतत्प्रतिबध्यतावच्छेदककोटौनिवेश्यते इच्छाकालेकेवल
विशिष्टप्रकारताकानुमित्यादेरेवोपगमेन नतत्रव्यभिचारः। इत्थंचतत्रैववन्हित्वाघनवच्छिन्नवन्ह्यादिप्रकारताशून्यायाः
विशिष्टप्रकारताकानुमितेस्तदभावव्याप्यवत्ताज्ञानप्रतिबध्यतावच्छेदकानाक्रांतायाः प्रसिद्धोभयव्याप्यवत्ता
ज्ञानकालेतथाविधवन्ह्यादिप्रकारताशून्यसंशयानुमितौ नकिंचिद्बाधकं। नचतादृशानुमितावीच्छायाहेतुत्वात्तदभावेनैव
संशयानुमितिर्नभविष्यतीतिवाच्यं। एवमपीच्छाकाले तस्यादुर्वारत्वात्। नचतत्रलाघवेनवन्हित्वादिविशिष्टप्रकारतैवप्र

त्याकार कानुमि

शिव ११

तिबध्यतावच्छेदककोटौनिवेश्यते। एवंचइच्छाकालेतादृशप्रकारताशून्यवन्हित्वाघनवच्छिन्नवन्ह्यादिप्रकारकानुमितिरेवोत्पद्यते
साचतदभावव्याप्यवत्तानिर्णयादिप्रतिबध्यैवेतिनानुपपत्तिरितिवाच्यं। विशिष्टवैशिष्ट्यबोधविषयतायास्तादृशसामग्रीप्रतिबध्य
तावच्छेदकत्वेतादृशसामग्रीकालेविशेष्येविशेषणमितिरीत्यापर्वतोवन्हिमानित्याकारकप्रत्यक्षवारणायतत्प्रतिबंधक
त्वकल्पनापत्तेः। तत्कालेतादृशज्ञानत्वस्यैवतत्प्रतिबध्यतावच्छेदकत्वोपगमेनैकप्रतिबंधकतयैवोपपत्तेः। अन्यथातत्तत्प्रत्यक्षवि
शिष्टवैशिष्ट्यविषयताशालिन्याबाधबुद्धिप्रतिबध्यतायाअप्यनुमितेः प्रसिद्ध्याबाधकालेतथाविधानुमितेरापत्तिरितिवाच्यं
विशिष्टविषयताप्रतिबध्यतावच्छेदककोटौनिवेश्यानुमित्यादिसाधारणबाधबुद्धेः प्रतिबंधकत्वांतरस्यकल्पनीयत्वात्सामग्रीप्र
तिबंधकतायाइच्छाभेदापेक्षितत्वात्प्रतिबंधकताद्वैरवोचितत्वात्। अपिचतदभावव्याप्यवत्ताज्ञानादिप्रतिबध्यतावच्छेदकेयदि
विशेष्येविशेषणमितिरीत्यावन्ह्यादिविशिष्टबुद्धित्वं तदानित्यसाधारण्यप्रसंगइतिजन्यत्वमप्युपादेयंतन्निवेशनीयं। तथा
चविनाशित्वस्यकालिकसंबंधेनघटत्वादिमत्त्वस्यवानिवेशमादायविनिगमनाविरहेणकार्यकारणभावानन्त्यप्रसंगः। त
न्निवेशेपिनित्यसाधारण्यस्यैवापरिहार्यत्वात्। अतस्तादृशबाधबुद्ध्यादीनामेवप्रतिबध्यतावच्छेदकत्वमुचितमिति
संशयानुमितिर्निराबाधैव। अपिचलौकिकसन्निकर्षजन्यबुद्धौव्यभिचारवारणायावश्यनिवेशनीयस्यलौकिकविषय
ताशून्यत्वस्य[illegible]भावादेवलाघवात्प्रतिबध्यतावच्छेदकत्वमितिचेत्। सत्यं। वन्ह्यादिविशिष्ट
बुद्धित्वस्यलौकिकप्रतिबध्यतावच्छेदकस्यैवरीत्यानित्यसाधारणत्वेनानुपपत्तेर्गुरुत्वाच्च। लौकिकमनसाविशिष्टबुद्धित्वस्यलौकिकप्रति
बध्यतावच्छेदकेचलौकिकविषयताशून्यत्वस्याऽनावश्यकतयाऽत्रकथंविशेषणांतरसन्निवेशस्तथात्वेगौरवमित्यस्वरसात्प्रतिब
वतन्तेवास्यबाधादीनामेवप्रतिबध्यतावच्छेदकत्वस्यावश्यकतयातत्साध्यकसंशयानुमितिर्दुर्वारैवेति

× इदंतुमिन्त्याद इच्छाविशिष्टविरोधिसामग्रीप्रतिबध्यतावच्छेदकंविशिष्टवैशिष्ट्यविषयताशालिबुद्धित्वमेवलाघवात्। नचैवंसतिविशेष्येविशेषणमितिवि
षयताशालिप्रत्यक्षंप्रतितादृशविरोधिसामग्र्याःप्रतिबंधकत्वांतरकल्पनेगौरवमितिवाच्यं। विशेष्येविशेषणमितिविषयताशालिबुद्धित्वस्यप्रतिबध्यता
वच्छेदकत्वेपिबाधादिकालीनेच्छाकालीननादृशविषयताभ्रन्यविशिष्टवैशिष्ट्यविषयताशालिप्रत्यक्षप्रसिद्ध्यातादृशविरोधिसामग्रीकालेतादृश

[illegible]

इदमपि चिंत्यं॰ गुरुत्वाभावव्याप्यवत्ताज्ञानस्य विप्रतिबध्यतावच्छेदकं कालिकसमवायोभयसंबंधेन गुरुत्ववत्ताबुद्धित्वं तथाचैतस्य नित्य
साधारण्यमित्यतींद्रियसाध्यकसंशयानुमितिप्रसंग इति। एतेन तदभावव्याप्यवदिमत्तानिर्णयकालीनतद्विशिष्टबुद्धौ तदभावव्याप्या
दयो विषयाधायर्थतद्विशेष्यतावच्छेदकतयाभासंते। एवं च वन्ह्यभावव्याप्यवान्पर्वतो वन्हिमानित्याकारकमेव सर्वं ज्ञानाहार्यज्ञानं तथा
वानुमित्यादिसाधारणं वन्ह्यभावव्याप्यत्वविशिष्टधर्मानवच्छिन्नपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्हिप्रकारताशालिज्ञानत्वा
दिकमेव पर्वतत्वाद्यवच्छिन्नविशेष्यकवन्ह्यभावव्याप्यवत्तानिर्णयादिप्रतिबध्यतावच्छेदकमिति न संशयानुमितिप्रसंगः। न च वन्ह्य
भावव्याप्यवत्तानिर्णयकाले इच्छासत्त्व इव तदसत्त्वेपि वन्ह्यभावव्याप्यवान्पर्वतो वन्हिमानिति प्रत्यक्षं स्यादिति वाच्यं॰ वन्ह्यभाव
व्याप्यत्वविशिष्टधर्मावच्छिन्नविशेष्यताकवन्हिचाक्षुषत्वाद्यवच्छिन्नं प्रति वन्हिचाक्षुषं जायतामितीच्छात्वादिना हेतुत्वोपगमात्॰ न च
पर्वतो वन्ह्यभावव्याप्यवानित्येतादृशनिर्णयशून्यकालेपि पर्वते वन्हिचाक्षुषं जायतामित्येतादृशचाक्षुषेच्छावत्त्वाद्वन्ह्यभावव्याप्य
वान्पर्वतो वन्हिमानित्येतादृशतादृशप्रत्यक्षप्रसंग इति वाच्यं॰ वन्ह्यभावव्याप्यविशिष्टपर्वतत्वावच्छिन्नविशेष्यताकबोधे विशे
ष्यतावच्छेदकप्रकारकज्ञानविषयापर्वतत्वावच्छिन्नविशेष्यताकवन्ह्यभावव्याप्यवत्तानिर्णयादीनां हेतुतायाः क्लृप्तत्वात्तादृशनि
र्णयशून्यकाले तथाविधप्रत्यक्षस्यापादनासंभवात्॰ अथ पर्वतो वन्ह्यभावव्याप्यवानित्येतादृशनिर्णयदशायां पर्वते वन्हि
प्रत्यक्षं जायतामित्येतादृशेच्छासत्त्वे सत्यां वयदानुमितिसामग्र्या वन्ह्यभावव्याप्यवत्त्वेन भासितुमर्हे पर्वतत्वावच्छिन्नविशेष्यक
वन्ह्यभावव्याप्यप्रकारकप्रत्यक्षं प्रति प्रतिबंधकीभूतायास्तादृशप्रत्यक्षत्वप्रकारकेच्छाविरहविशिष्टभिन्नविषयकानुमितिसा
मग्र्याः सत्त्वादिति न तत्र वन्ह्यभावव्याप्यानवच्छिन्नविशेष्यताकेनाहार्यवन्हिविशिष्टबुद्धिर्भविष्यतीति तत्र व्यभिचारवारणायर
छायाङ्केजवत्त्वमावश्यकमित्यतस्त्वा लुप्तत्वादिकमेव तत्प्रतिबध्यतावच्छेदकं वक्तव्यमिति चेन्न॰ पर्वतत्वावच्छिन्नेवन्ह्य शिव १२
भावव्याप्यप्रकारकप्रत्यक्षं जायतामित्येतादृशेच्छाविरहविशिष्टविरोधिसामग्र्याः प्रतिबध्यतावच्छेदकं यदि पर्वतत्वा

वच्छिन्नविशेष्यकवन्ह्यभावव्याप्यप्रकारकप्रत्यक्षत्वं तदा तादृशेच्छां विनापि वन्ह्यभावव्याप्यविशिष्टपर्वतत्वावच्छिन्नविशेष्यकयादृशप्रत्यक्षप्रकार
केच्छावत्त्वाद्विरोधिसामग्रीदशायां तथाविधप्रत्यक्षोत्पत्त्या तत्र व्यभिचार इत्यतो वन्ह्यभावव्याप्यातिरिक्तप्रकारतानिरूपितपर्वतत्वावच्छिन्न
विशेष्यताशालिप्रत्यक्षत्वमेव तत्प्रतिबध्यतावच्छेदकं वाच्यं तथा च तादृशेच्छां विनापि वन्ह्यभावव्याप्यवान्पर्वतो वन्हिमानित्येतादृशप्रत्य
क्षोत्पत्तौ न किंचिद्बाधकं॰ न च वन्ह्यभावव्याप्यवत्पर्वतत्वावच्छिन्नविशेष्यकवन्ह्यादिप्रत्यक्षं प्रति वन्ह्यभावव्याप्यप्रकारतानिरूपितपर्वत
त्वावच्छिन्नविशेष्यतानिरूपितवन्ह्यादिप्रकारताशालिप्रत्यक्षत्वप्रकारकेच्छाविरहविशिष्टविरोधिसामग्र्याः प्रतिबंधकत्वात्तादृशे
च्छां विना कथं तथाविधप्रत्यक्षमुत्पत्स्यते इति वाच्यं॰ तथापि च्छेच्छायाः पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्हिप्रकारताशालिप्रत्यक्षं जायता
मित्येतादृशेच्छासाधारणरूपेणैवोत्तेजकत्वसंभवात्तादृशेच्छां विनापि तादृशेच्छावत्त्वात्तथाविधप्रत्यक्षोत्पत्तौ बाधकाभावादिति न किंचिद
नुपपन्नं॰ अथैवमपि यत्र भाविवन्ह्यभावव्याप्यवत्त्वावगाहनाबुद्धिरप्रमेत्यप्रामाण्यग्रहद्वितीयक्षणे ऽपेक्षाबुद्ध्यात्मकवन्ह्यभाववन्ह्यभावव्या
प्याभाववान्पर्वत इत्येतादृशनिर्णयस्यादनेनैव वन्ह्यभावव्याप्यवान्पर्वत इति निर्णयस्य तदप्रामाण्यग्रहनाशस्य तदनंतरं च पर्वते व
न्हिप्रत्यक्षं जायतामितीच्छानुदयेन त्वन्नाहार्यवन्हिविशिष्टबुद्धौ वन्ह्यभावव्याप्यवत्त्वेन भासितुमर्हे इति तदभाववन्निर्णयस्य प्रागसत्त्वात्
तस्मादृशबुद्धौ व्यभिचारवारणाय च्छायाङ्केनेककत्वमावश्यकमिति चेत्तादृशतद्भावव्याप्याभाववत्तानिर्णयनाशोत्तरक्षणे वाहार्यत
द्विशिष्टबुद्धेरपगमस्येति तत्र तद्वत्तदभावव्याप्यवत्त्वभाने बाधकाभावः। अथवाहार्येज्ञाने वन्ह्यभावव्याप्यपर्वतत्वयोरेकत्र द्वयमिति
रीत्यादि प्रतिविशेषणतापन्नयोरेव वन्हेर्दुर्निर्वाच्यच्छेदकत्वमुपेयते न तु तयोर्विशेषणविशेष्यतावच्छेदकभावस्तथा। विध्यबोधे च य
वतत्वविशिष्टवन्ह्यभावव्याप्याभाववत्तानिर्णयोऽकिंचित्कर एवेति न काचिदनुपपत्तिः। न चैवं पर्वतत्वावच्छिन्नविशेष्यकवन्ह्यभा
वव्याप्यवत्तानिर्णयदशायामिव तच्छून्यकालेपि निर्धर्मितावच्छेदककवन्ह्यभावव्याप्यवत्ताज्ञानसत्त्वे इदं वन्ह्यादिकमेकं द्वय
मिति रीत्या वन्ह्यभावव्याप्यपर्वतत्वे विशेष्यतावच्छेदकीकृत्य वन्हिप्रकारकप्रत्यक्षापत्तिः तादृशविशिष्टे शिष्टबोधे पर्वतत्वावच्छि
न्नविशेष्यकवन्ह्यभावव्याप्यवत्तानिर्णयत्वेनाहेतुत्वात्तदानीं तन्न वन्हिविशिष्टबुद्धेश्च विरोधिज्ञानानुत्तरत्वादाहार्यत्वाद

नाहार्यज्ञानेन विरोधिधर्मस्य विशेष्यतावच्छेदकतयाऽभानादिष्टापत्तेर्न संभवतीति वाच्यं तादृशाहार्यबोधे तथाविधनिर्णयस्य स्वातंत्र्ये
तेन हेतुताकल्पनेनाप्यसम्भवात्। न चाहार्यज्ञाने तादृशनिर्णयस्य स्वातंत्र्येण हेतुत्वे एकत्र द्वयमिति रीत्या वह्न्यभावव्याप्यपर्वतत्वयोर्विनि
विशेष्यतावच्छेदकत्वं स्वीक्रियते किं वा पर्वतत्वस्य वह्निधर्मितावच्छेदकत्वं तस्य च तदभावव्याप्यधर्मितावच्छेदकत्वमित्यत्र विनिगमका
भाव इति वाच्यं। वह्न्यादेस्तदभावव्याप्यविशेष्यतावच्छेदकत्वोपगमेऽनुगमकधर्मापेक्षयाऽगुरोः प्रतिबध्यतावच्छेदकस्य दुर्वचत्वादिति निपरास्त
रूपाया अनुमितेः कोऽपि नित्यस्य साधारण्येऽवारणाच्चाक्षुषादीनां प्रतिबध्यतावच्छेदकतयाऽवश्यकत्वादिति। केचित्तु प्रत्यक्षस्थले
चाक्षुषत्वादिकमेव प्रतिबध्यतावच्छेदकं मेवमपि शाब्दोपमितिस्मरणेषु शाब्दत्वाद्यवच्छेदेन नानाप्रतिबध्यत्वकल्पनापेक्षया सर्वसाधार
ण प्रत्यक्षान्यज्ञानत्वावच्छेदेनैकप्रतिबध्यत्वकल्पनमेवोचितं। एवं चानुमितेरपि तदन्तर्गततया नेसद्ग्राह्यानुमितिप्रसंगः तदभावव्याप्यव
त्तानिर्णयदशायां योग्यताज्ञानानुत्पत्त्यैव शाब्दधीवारणसंभवात् उपमितेश्च शक्तिपरिच्छेदकतया पर्वतत्वादिविशिष्टे वह्न्यादिवैशिष्ट्याना मात्र
वगाहित्वात्तदभावव्याप्यवत्तानिर्णये न वैशिष्ट्यज्ञानमुदयात् एकाकारसंस्कारनाशे तत्संस्कारस्य कारणाविरहेऽपि तदुत्तरे विशिष्टस्म
रणासंभवात् प्रत्यक्षान्यवह्न्यादिविशिष्टज्ञानेन तदभावव्याप्यवत्तानिर्णयस्य प्रतिबंधकत्वमेव नास्तीति पुनरनालोचनविजृम्भितमेव तत्
आहि। शाब्दबुद्धौ तदभावव्याप्यवत्तानिर्णयस्य प्रतिबंधकत्वे योग्यताज्ञानस्य तदभावव्याप्यवत्तानिर्णयाविरोधितया तदुत्तरेऽपि तत्र तदभाव
व्याप्यवत्तानिर्णयसत्त्वदने तदुत्तरं तत्प्रकारकशाब्दबोधापत्तिः। एवं वह्निमत्पर्वतत्वावच्छिन्नविशेष्यकसादृश्यप्रत्यक्षजन्यायां तादृशधर्मा
वच्छिन्नविशेष्यके किंचित्पदवाच्यत्वोपमितेः पर्वतत्वादिविशिष्टे वह्न्यादिवैशिष्ट्यावगाहित्वयोपमितावपि वह्न्यभावव्याप्यवत्तानि
र्णयादेः प्रतिबंधकत्वमावश्यकं। एवं स्मरणेऽपि तस्य प्रतिबंधकत्वमावश्यकं अन्यथा लौकिकसन्निकर्षजन्यवह्न्यादिप्रकारकज्ञा
नजनितस्य तथाविधसंस्कारस्य तादृशज्ञानविरोधिना तदभावव्याप्यवत्ताज्ञानेन नाशयितुमशक्यतया तादृशसंस्कारात्तदभा
वव्याप्यवत्तानिर्णयोत्तरे विशिष्टस्मरणप्रसंगादिति। स्यादेतत्। एतन्मते प्रत्यक्षान्यत्वविशिष्टज्ञानत्वस्य ज्ञानत्वविशिष्टप्रत्य शिव
क्षान्यत्वस्य वावच्छेदकत्वे विनिगमनाविरहेण प्रतिबंधकतावाहुल्यमवच्छेदकगौरवं चेत्यतदपेक्षया शाब्दत्वादीनामेव प्रतिबध्यता १३

२८

[smudged] प्रत्यक्षान्यत्वविशिष्टं ४

वह्निप्रकारकत्व ५

वच्छेदकत्वमुचितं। अत्र प्रत्यक्षान्यत्वज्ञानत्वयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहेणैतन्मते प्रतिबंधकताद्वयं शाब्दत्वादीनामव
च्छेदकत्वे च प्रतिबंधकतात्रयमिति प्रत्यक्षान्यज्ञानत्वस्यैव तथात्वमुचितं प्रतिबध्यप्रतिबंधकभावे द्वयावच्छेदकलाघवस्य अकिंचित्करत्वा
दिति तु न शक्यते वक्तुं यतो न केवलं प्रत्यक्षान्यज्ञानत्वं वह्न्यभावव्याप्यवत्तानिर्णयाभावस्य जन्यतावच्छेदकं किंतु वह्न्यादिप्रकारकप्रत्यक्षान्यज्ञा
नत्वं तत्र च वह्निप्रकारकत्वविशिष्टं यत्प्रत्यक्षान्यत्वं तद्विशिष्टं यद्वह्निप्रकारकत्वं तद्विशिष्टं वा ज्ञानत्वमवच्छेदकमित्यत्र विनिगमकाभावात्
ज्ञानत्वमवच्छेदकीकृत्यैव कार्यकारणभावद्वयं। एवं रीत्या प्रत्यक्षान्यत्वमप्यवच्छेदकीकृत्य प्रत्येकद्वयं द्वयं कल्पनीयमिति कार्यकारणभाव
चतुष्टयमेतन्मते शाब्दत्वादीनामवच्छेदकत्वकल्पनेऽपि वह्निप्रकारकत्वविशिष्टशाब्दत्वं तद्विशिष्टं वा वह्निप्रकारकत्वमवच्छेदकमित्यत्र विनिगम
काभावाच्छाब्दत्वस्यान्नेकार्यकारणभावद्वयं स्मृत्युपमित्योरपि प्रत्येकमेतादृशरीत्या द्वयं द्वयमिति कार्यकारणभावषट्कमेवेत्युभयत्र कार्यका
रणभावसाम्ये प्रत्यक्षान्यत्वस्यावच्छेदकत्वकल्पने पुनरवच्छेदकगौरवमधिकमिति। अथ शाब्दत्वादीनां तथात्वकल्पनेऽपि तेषां मयायां तथात्व
स्वीक्रियते प्रत्यक्षान्यत्वविशेषितज्ञानत्वस्यैकस्यैव तत्र न विनिगमनाविरहात्तादृशधर्मस्यापि तथात्वं दुर्वारमेव तस्य तथात्वे ज्ञानत्वविशिष्ट
प्रत्यक्षभेदस्य तथात्वमादाय विनिगमनाविरहस्तु न तादृशविनिगमनाविरहभंजकः अन्याणामवच्छेदकत्वकल्पनेऽपि ज्ञानत्वविशिष्टप्रत्यक्षभे
दस्य तथात्वमादाय विनिगमनाविरहसंभवादिति चेत्तर्हि घटादिकं प्रति दंडत्वचक्रत्वादिना हेतुत्वं कल्प्यते चक्रसमवहितदंडत्वादिना वेत्यत्रावि
निगमनाविरहात्तादृशविशिष्टप्रकारेणापि हेतुताप्रसज्येत। विशिष्टस्य हेतुत्वे विशेषणविशेष्यभावे विनिगमनाविरहस्य त्वदुक्तदिशोऽकिंचि
त्करत्वादिति न किंचिदेतत्। मैवं। यदि हि सामानाधिकरण्यसंबंधेनैकधर्मावच्छिन्नस्यापरस्यावच्छेदकत्वं स्वीक्रियते तदेव मिथो विशेषणवि
शेष्यभावे विनिगमनाविरहः प्रसज्यते वयं तु न तथाभूतस्यावच्छेदकत्वं कल्पयामः किंत्वेकत्र द्वयमिति न्यायेन ज्ञानांशे विशेषणताप
न्नानां मिथो विशेषणविशेष्यभावानापन्नानां वह्निप्रकारकप्रत्यक्षान्यत्वज्ञानत्वानामेव तथात्वं। अत एव न विनिगमनाविरहेण कार्यकारण
भाववाहुल्यप्रसक्तिः अवच्छेदकभेदेऽपि तावत्त्वेकस्या एवावच्छेदकताया उपगमादवच्छेदकभेदाभावेन कार्यकारणभावैक्यं। न च विशेष
णविशेष्यभावानापन्नानां प्रत्यक्षान्यत्वादीनां प्रत्येकमतिप्रसक्ततयाऽवच्छेदकत्वं न संभवतीति वाच्यं। अवच्छेदकताया व्यासज्यवृत्तितोप

पगमात्रत्वे केताद्दशधर्माणामतिप्रसक्तत्वेप्यवच्छेदकत्वपर्याप्त्यधिकरणस्यैवेत्ततस्तस्यानतिप्रसक्ततयाऽनुपपत्त्यभावात्। न नावच्छेदकत्वे मा
तिरिक्तमानाभावात् किंतु स्वरूपसंबंधविशेषः तस्य च प्रत्येकविश्रांततया व्यासज्यवृत्तित्वे न संभवतीति वाच्यं। अवच्छेदकत्वस्यावच्छेदक
त्वेऽभेदेनाधाराधेयभावोनुपपत्तेरिति रिक्तावच्छेदकत्वस्वीकारस्यावश्यकत्वात्। अत एव महानसीयवह्न्यभावप्रतियोगिताया अपि
नसीयत्ववह्नित्वोभयपर्याप्तस्य तदवच्छेदकत्वेनुपपद्यते। न नुन तयोर्नावच्छेदकत्वं किंतु एकस्यावच्छेदकत्वमन्यस्य सामानाधिकरण्यसं
बंधेनावच्छेदकतावच्छेदकत्वं। अवच्छेदकत्वस्य च स्वरूपतोऽतिप्रसक्तत्वेप्यवच्छेदकतावच्छेदकविशिष्टस्यानतिप्रसक्तत्वान्नानुपपत्तिरिति वा
च्यं। तथा सति धूमवद्वह्नित्वोदरविताद्दशाभावप्रतियोगितावच्छेदकत्वपर्याप्त्यधिकरणतया वक्तव्यतिरेकप्रसंगोऽवच्छेदकत्वपर्याप्त्यधिकरण
त्वविवक्षया तु द्रव्यवह्नित्वोदरनवच्छेदकत्वोपपादनस्यासंगत्यापत्तेः। यत्त्ववच्छेदकताव्यासज्यवृत्तित्वे पक्षभेदद्वयमिति रीत्या ज्ञानेशविशे
षणतापन्नानां ताद्दशधर्माणामवच्छेदकत्वं स्वीक्रियते किंवैकविशिष्टेऽपरवैशिष्ट्यमिति रीत्या धर्मिविशेषणतापन्नानां तेषामवच्छेदकत्व
कार्यकारणभावग्रहपूर्वं विशेष्यतावच्छेदकप्रकारकज्ञानस्य कल्पनीयतया गौरवात्। वस्तुतस्तु ताद्दशाविनिगमनाविरहेऽप्यवच्छेदकत्व
स्यैकस्यावश्यकत्वे तत्कार्यकारणभावभेदानां किंविदेतदित्याहुः। इदमत्र चिंतयामः। तावद्धर्मवैशिष्ट्येऽवच्छेदकत्वस्यैव मत्यंतान्वयं च दुर्निवारमेव। तथाहि
केवलप्रत्यक्षभेदादिनिष्ठं यदवच्छेदकत्वं तन्निरवच्छिन्नमेव धर्माः स्वरूपतो न भासेरन् तेन तन्निष्ठावच्छेदकतायाः किंचिद्धर्मावच्छिन्नत्वनियमात्
भेदादीनां च केदापि स्वरूपतोऽभानादत एव प्रत्यक्षभेदत्वादिकं तदवच्छेदकं वाच्यं तथा च कथं ताद्दशमवच्छेदकत्वे ज्ञानत्वादौ न तेन तस्य
स्वावच्छेदकीभूतप्रत्यक्षभेदत्वानधिकरणत्वात् ज्ञानत्वादिवृत्तौ वा कथं न्यूनवृत्तिप्रत्यक्षभेदत्वादिकं तदवच्छेदकं स्यादिति ज्ञानत्वादौ न
दनवच्छिन्नमवच्छेदकत्वोतरं याव्यमिति प्रोक्तेन मवच्छेदकताया व्यासज्यवृत्तित्वेन अपितु ज्ञानत्वनिष्ठमवच्छेदकत्वं समवायावच्छिन्न

कृतं

प्रत्यक्षभेदादिनिष्ठं वा तद्विशेषणताविशेषावच्छिन्नमित्यवच्छेदकताघटकसंबंधभेदाद्दवच्छेदकभेद आवश्यकः। अपि चैवं धूमवद्वह्नित्वादे
र्हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वोपपादने दीधितिकृतामसंगतेतत्राप्यवच्छेदकताघटकसंबंधादिभेदेनावच्छे शिव
दकताया ऐक्यानुपपत्तेः स्तद्व्यासज्यवृत्तित्वासंभवादित्येतावतामस्माकमपराधः तस्मादवच्छेदकताया व्यासज्यवृत्तित्वासंभवाद्वह्नि १४
प्रत्यक्षविनिगमनाविरहात्कार्यकारणभावबाहुल्यमस्त्वेवेति। नदसत्। एकविशिष्टेऽपरवैशिष्ट्यमिति रीत्या धर्मिविशेषणतापन्नानां तेषा १०४

प्रकारकप्रत्यक्षान्यज्ञानत्वस्यावच्छेदकत्वकल्पे ज्ञानत्वं कार्यतावच्छेदकं प्रत्यक्षभेदश्च सामानाधिकरण्यसंबंधेन तत्त्वावच्छेदकः। वह्निप्रकारक
त्वं च सामानाधिकरण्यसंबंधेन तत्त्वावच्छेदकमित्युपगंतव्यमित्युपदर्शितविनिगमनाविरहो ब्रह्मणोपि दुर्वारः। अथावच्छेदकताभूतस्य तु गुरु
त्वाद्वविसामानाधिकरण्यसंबंधेन प्रत्यक्षभेदस्य सत्त्वात्कथं तस्य ज्ञानत्वनिष्ठावच्छेदकत्वावच्छेदकत्वमिति चेदात्मन मेवोपालंभस्व- अथ वह्नि
प्रकारकत्वाद्दत्वादीनामवच्छेदकत्वकल्पेपि धूमद्दशाद्दत्वादिकमेवावच्छेदकं वह्निप्रकारकत्वं च सामानाधिकरण्यसंबंधेन तत्त्वावच्छेदकमिति
न संभवति सामानाधिकरण्यसंबंधेन वह्निप्रकारकत्वेन स्यादतिप्रसक्तत्वाद्दृत्वावच्छेदकतायां व्यासज्यवृत्तित्वं विनाकथमनुपपत्तिरिति चेन्न ताद्दशा
द्दत्वादिनिष्ठसामानाधिकरण्यसंबंधेनैव वह्निप्रकारकत्वस्यावच्छेदकतावच्छेदकत्वमुपपद्यते। नहि तेन संबंधेन तदतिप्रसक्तमित्यदोष इति।
यत्तु प्रत्यक्षान्यज्ञानत्वस्यावच्छेदकत्वकल्पेपि यदि सामानाधिकरण्यसंबंधेन प्रत्यक्षत्वावच्छिन्नभेदस्य ज्ञानत्वांशे विशेषणत्वं स्वीक्रि
यते तदैव विपर्ययेन विशेषणविशेष्यभावमादाय विनिगमनाविरहः प्रसज्येत न देवं परं तु स्वावच्छिन्नप्रतियोगिताकभेदसमवाय
घटितसामानाधिकरण्यसंबंधेन प्रत्यक्षत्वस्यैव ज्ञानत्वांशे विशेषणत्वमुपेयते तथा च विशेषणविशेष्यभावविपर्यासे ताद्दशगुरुसंबंधेन प्र
त्यक्षत्वस्यावच्छेदकत्वे याव्य मनतु समवायेन ज्ञानत्वमवच्छेदकमित्यवच्छेदकताघटकसंबंधलाघवमेव विनिगमकमवच्छेदकताव
दकघटकसंबंधस्य नो भयकल्पे एव समशरीरता प्रत्यक्षत्वस्यावच्छेदकत्वकल्पेपि समवायत्वावच्छिन्नप्रतियोगिताकभेदघटितसा
मानाधिकरण्येन ज्ञानत्वस्य तदवच्छेदकताया वाच्यत्वात् ज्ञानत्वांशे ताद्दशसामानाधिकरण्यसंबंधेन प्रत्यक्षत्वस्य विशेषणताविशेष
समवायघटितसामानाधिकरण्यसंबंधेन प्रत्यक्षत्वावच्छिन्नभेदस्य वा विशिष्टानिवेश्यत इत्यत्र विनिगमनाविरह इति तु नाशंकनीयं
ज्ञानत्वांशे प्रत्यक्षत्वावच्छिन्नभेदवैशिष्ट्यनिवेशेऽवच्छिन्नत्वांशे प्रत्यक्षत्वप्रतियोगिकसंबंधस्य भेदांशे विशेषणतावैशिष्टस्य निवेशा
धिक्यात्। एतेन ताद्दशसामानाधिकरण्यसंबंधेन प्रत्यक्षत्वविशिष्टज्ञानत्वस्य समवायविशेषणताघटितसामानाधिकरण्येन ज्ञान
त्वविशिष्टप्रत्यक्षत्वावच्छिन्नभेदस्यैव वाऽवच्छेदकत्वं स्वीक्रियतामित्यत्र विनिगमनाभाव इत्यपि निरस्तमिति। तदप्यसत्। एवमपि विषयता

दिसंबंधेन प्रत्यक्षत्वावच्छिन्नस्य भेदमादायातिप्रसंगवारणाय समवायावच्छिन्नत्ववृत्तिप्रतियोगितावच्छेदकताकभेदघटितसामानाधिक
रण्यसंबंधेनैव प्रत्यक्षत्वविशिष्टज्ञानत्वस्यावच्छेदकतामावश्यकत्वेन तया स्वावच्छिन्नप्रत्यक्षत्ववृत्तिप्रतियोगितावच्छेदकताकभेदघटितसा
मानाधिकरण्यसंबंधेन समवायविशिष्टज्ञानत्वस्य तत्त्वम् शरीरस्यावच्छेदकत्वमादाय विनिगमनाविरहस्य दुरुद्धरत्वात्· किं वा पूर्वोक्त
तत्सामानाधिकरण्यसंबंधेन विशिष्टज्ञानत्वस्य समवायेन शुद्धज्ञानत्वस्य वा स्वावच्छिन्नप्रतियोगिताकभेदघटितसामानाधिक विरोधपत्रता
रण्येन प्रत्यक्षत्वविशिष्टसमवायेनावच्छेदकत्वं स्वीक्रियतइत्यत्र न विनिगमकत्वेऽपीत्यलमनसद्रहेण· अन्ये तु अनुमितौ वह्निमन्तमनुमिनो
मि न पर्वतत्वादिकमित्यादिप्रतीतिसाक्षिको विधेयताख्यो विषयताविशेषः स च प्रत्यक्षव्यावृत्त एव तत्साधारण्ये मानाभावात् एवं च शाब्द
बोधोपमित्यादीनां नाधर्मावच्छेदेन प्रतिबध्यतावच्छेदकत्वापेक्षया लाघवेन विधेयताया एव तथात्वमुपेयते सा चानुमितिसाधारण्येऽपीति न संशया
ति नुमितिप्रसंगः नन्वतस्याः स्मृतिसाधारण्ये मानाभाव इति वाच्यं· तस्याः स्मृतिसाधारण्योपगमेन तत्प्रतिबंधकत्वान्तरकल्पनेन लाघवा
देव तस्यास्तथात्वसिद्धेः। अथ वन्ह्यभाववद्व्याप्यवत्तानिर्णयस्य प्रतिबध्यतावच्छेदकं यदि वह्निविधेयत्वं तदा वह्निमान्पर्वतो घटवान्वेत्या
दिशाब्दबोधादीनां तदप्रतिबध्यत्वप्रसंग इति चेन्न तोऽस्मिन्न वयं वह्निविधेयतायास्तदभाववद्व्याप्यवत्तानिर्णयप्रतिबध्यतावच्छेदकत्वं वदामः
किं तु वह्निप्रकारकत्वविशिष्टविधेयतासामान्यस्य तत्तादृशशाब्दबोधादिसाधारणमेवेति न काचिदप्यनुपपत्तिरित्याहुः। तन्न· विधेय
तायास्तदभाववद्व्याप्यवत्ताप्रतिबध्यतावच्छेदकत्वे तर्कात्मकज्ञाने व्यभिचारात् अविधेयत्वानुपगमे वह्निप्रकारकापमित्यावच्छिन्नाभाव
न्ती त्वेव वह्निमापादयामीति प्रतीतिविषयतावत्कत्वाद्वह्निमान्पर्वतो घटवान्स्यादित्याकारकतर्कोत्तरतादृशप्रत्ययानुपपत्तेस्तत्र विधेय
तास्वीकारस्यावश्यकत्वात्· न चापत्तौ विधेयतातोऽन्य एवापाद्यताख्यो विषयताविशेषः स्वीक्रियते वह्निमापादयामीत्यादिप्रतीतिश्च तत्स्या
दिवृत्तिस्तादृशविषयतानिरूपकापत्तित्वावच्छिन्नाभाव एव विषयो न तु वन्ह्यादिप्रकारकापत्तित्वावच्छिन्नाभाव इति नोक्तानुपपत्तिरिति वा
च्यं· कृप्तविधेयताख्यविषयतयैवोपपत्तौ तर्कात्मकज्ञाने विलक्षणविषयतायां मानाभावादिति· परे तु शाब्दत्वादिना नाधर्मावच्छेदेन तद श्रीव १५
भावव्याप्यवत्तानिर्णयादिप्रतिबध्यत्वकल्पनापेक्षया पारोक्ष्यजातिमेकां स्वीकृत्य तदवच्छेदेनैव तत्त्वकल्पनमुचितं तस्याश्च जातेर

नुमितिसाधारण्यमावश्यकमन्यथाऽनुमिनोमि बाधबुद्धेः स्वतंत्रप्रतिबंधकत्वकल्पनापत्तेः। एवं चानुमितेरपि तदभाववद्व्याप्यवत्तानिश्चयप्रतिबध्यतावछे
दकाक्रांततया नैव संशयानुमितिप्रसंगः। न चानुभवत्वजात्या सांकर्यात् परोक्षत्वजातिकल्पनं न संभवतीति वाच्यं· अनुभवत्वजातौ मानाभावात्·
स्यादेतत्· एतादृशजातेरनुमितिसाधारण्यं न घटते तत्र प्रत्येकभिन्नविषयकानुमितिसामग्रीप्रतिबध्यतावच्छेदकतया सिद्धेनानुमितित्वादिजाति
विरोधेन सांकर्यप्रसंगात्· तथा हि परोक्षत्वमनुमितौ न वा स्वानुमितिसामग्रीप्रतिबध्यतावच्छेदकजातिः· सा च प्रत्यक्षे न परोक्षत्वं शाब्द
बोधादौ च द्वयोः समावेश इति। न चानुमितिसामग्र्यां चाक्षुषत्वादिप्रकारत्वे घ्राणजत्वेत्ययुक्ते जनकतया चाक्षुषत्वादिकमेव तत्प्रतिबध्यतावच्छेदकतायां
तथा च कृप्ततत्प्रतिबध्यतावच्छेदकतया जातिसिद्धिरिति वाच्यं· अनुमित्या विशिष्टानुमितिसामग्र्या भिन्नविषयकानुमित्यन्यज्ञानं प्रति प्रतिबंधकतायामि
च्छाया उत्तेजकत्वाभावात्तादृशप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकतयैव जातिविशेषसिद्धेः। न च भिन्नविषयकज्ञानत्वमेव तत्प्रतिबध्य
तावच्छेदकमस्तु किं वैजात्येनेति वाच्यं· तथा सत्यनुमित्साविशिष्टवन्ह्याद्यनुमितिसामग्रीकाले घटाद्यनुमितिसामग्र्यां सत्यामप्यनुमित्यनुदयाप
त्तेः। न च पर्वतत्वावच्छिन्नविशेष्यकवन्ह्याद्यनुमितिसामग्र्याः पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्ह्यादिप्रकारताशून्यज्ञानत्वमेव प्रतिबध्यता
वच्छेदकं वक्तव्यं तादृशानुमितिसामग्रीकाले नापि घटाद्यनुमितेः पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्ह्यादिप्रकारताशालित्वेन तादृशप्रति
बध्यतावच्छेदकाक्रांततया नानुपपत्तिरिति वाच्यं· पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्ह्यादिप्रकारताशून्यज्ञानत्वस्यानुमितिसामग्र्यभाव
जन्यतावच्छेदकत्वे पर्वतो वह्निमानिति प्रत्यक्षादिसामग्रीकाले तथाविधप्रत्यक्षाद्युत्पत्तये मानेऽनुमितिसामग्र्यभावरूपकारणवत्त्वतादृशप्रका
रताशून्यज्ञानत्वावच्छिन्नापत्तेः तद्वारणाय तादृशवन्ह्यादिप्रकारताशून्यज्ञानत्वावच्छिन्नं प्रति तादृशवन्ह्यादिप्रकारताशालिप्रत्यक्षादिसामग्रीणां प्रति
बंधकताकल्पने चातिगौरवात्· अथ वन्ह्यादिप्रकारताशून्यत्वस्य वन्ह्याद्यनुमितिसामग्रीप्रतिबध्यतावच्छेदककोटौ निवेशने तादृशापत्तिवारकसा
मग्रीप्रतिबंधकताकल्पनं नावश्यकमन्यथाऽनुमित्साविशिष्टवन्ह्याद्यनुमितिसामग्रीकाले तादृशानुमितिप्रतिबंधकप्रत्यक्षेच्छाविशिष्टप्रत्य
क्षसामग्रीसत्वे घटादिप्रत्यक्षोपपत्तये तादृशसामग्रीप्रतिबंधकतायामिच्छाविशिष्टसमानविषयकप्रत्यक्षादिसामग्र्यभावनिवेशनप्रसंगेन म
हागौरवात् वन्ह्यादिप्रकारताशून्यज्ञानत्वस्य प्रतिबध्यतावच्छेदकत्वे वन्ह्यादिविषयकघटादिप्रत्यक्षस्योत्पत्तौ बाधकाभावात् तादृशसाम
ग्र्यभावो निवेश्य न इति चेन्न वन्ह्यादिप्रकारताशून्यत्वस्य वन्ह्याद्यनुमितिसामग्रीप्रतिबध्यतावच्छेदककोटौ निवेशे वह्निकदाचिद्बहिरभय

स्यानुमित्साविशिष्टानुमितिसामग्रीप्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीवत्तत्र वह्निघटोभयविषयकप्रत्यक्षापत्तिः तुल्ययुक्त्या घटाद्यनुमितिसामग्र्याः
विघटप्रकारताश्रयत्वाहानत्वावच्छिन्नं प्रत्येकं विरोधितया तादृशसमूहालंबनस्य घटानुमितिसामग्र्याप्रतिबध्यत्वात् न चेष्टापत्तिः तदानीं प
रस्परविशेषेणानुमितेरिव प्रत्यक्षस्यानुत्पादात् अन्यथेच्छाविशिष्टवह्निप्रत्यक्षादिसामग्रीकाले तत्प्रतिबंधकीभूतघटाद्यनुमित्साविशिष्टतद
नुमितिसामग्रीसत्वे वह्न्याद्यनुमित्युपपत्तये तत्प्रतिबध्यतावच्छेदककोटावपि तुल्ययुक्त्या भिन्नविषयकत्वघटितत्वनिवेशप्रसंगेन तदानीं स
मूहालंबनानुमित्युत्पत्तावपि विरोधकाभावात् ज्ञानद्वयमेव यौगपद्यप्रसंगात् न च स्यात्सामग्रीप्रतिबंधकतायां सामग्र्यंतराभावघटितनिवेशनीयोऽन
नुप्रतिबध्यतावच्छेदककोटौ वह्न्यादिप्रकारताशून्यत्वं मितिः न वानुमितिसामग्रीप्रतिबंधकतायां समानविषयकप्रत्यक्षादिसामग्र्यभा
वनिवेशनेनोपदर्शितस्थले प्रत्यक्षोत्पत्तिभाररहानसंभवति वह्न्यादिप्रत्यक्षसामग्रीसत्वे नानुमितिसामग्र्याः असत्वादिति वाच्यं तत्रैव
घटाद्यनुमितिसामग्रीसत्वेन भिन्नविषयकानुमितिसामग्र्यभावघटितायाव वह्न्यादिप्रत्यक्षसामग्र्या अभावात् न च तत्र घटाद्यनुमितिसा
मग्र्येव नास्ति तत्प्रत्यक्षसामग्रीसत्वादिति वाच्यं वह्न्याद्यनुमितिसामग्रीप्रतिबंधकतावच्छेदककोटिप्रविष्टाभावप्रतियोगिन्यां तत्प्रत्य
क्षसामग्र्यां घटादिप्रत्यक्षसामग्र्यभावघटितायामेव घटाद्यनुमितिसामग्र्या अभावनिवेशात् प्रकृतस्थले च तादृशतदनुमितिसामग्र्याः
सत्वेनानुपपत्त्यभावात् एतेन सामग्रीप्रतिबंधकतायां सामग्र्यंतरस्याभावनिवेशे तादृशसामग्र्यंतरेऽपि सामग्र्यंतराभावनिवेशस्य त्व
वं क्रमेणानवस्थाप्रसंग इति निरस्तं विश्रांतेरुपदर्शितत्वात् अथ भिन्नविषयकानुमित्सान्यज्ञानप्रति अनुमित्साविशिष्टानुमितिसामग्रीप्र
तिबंधकतायां यदि समानविषयकप्रत्यक्षसामग्र्यभावादिनिवेशनमावश्यकं तदाविशिष्टविशिष्टप्रत्यक्षत्वशाब्दत्वादीनामेव प्रतिबध्य
तावच्छेदकत्वमुचितं प्रत्यक्षशाब्दसाधारणविजातीयज्ञानत्वावच्छिन्नं प्रत्येकप्रतिबंधकताकल्पने समानविषयकशाब्दसामग्रीसमान
विषयकप्रत्यक्षसामग्र्योरभावकूटस्यैकत्र निवेशनीयतया विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभावद्व शिच.
यकल्पनाप्रसंगात् विशिष्टप्रत्यक्षत्वादीनां प्रतिबध्यतावच्छेदकत्वे तु प्रत्यक्षस्थले प्रतिबंधकतायां प्रत्यक्षसामग्र्यभावानिवेशात् स्थली २६
यप्रतिबंधकतायां च शाब्दसामग्र्यभावानिवेशनेनैतेषामेकत्रानिवेशान्न विशेषणविशेष्यभावे विनिगमनाविरहप्रसंग इति चेन्न

व्यनीदृशतर्कांगविधयावह्न्याद्यनुमितिसामग्र्याः प्रतिबंधकतायां प्रत्यक्षत्वशाब्दत्वादीनां प्रतिबध्यतावच्छेदकत्वंशकानेवस्यावितुमेवमप्यनुमित्सा
विशिष्टगुरुत्वाद्यनुमितिसामग्रीप्रतिबध्यतावच्छेदकं तयाऽनुमित्यन्यज्ञानत्वविशिष्टस्यैवं तत्र समानविषयकलौकिकप्रत्यक्षमस्ति शाब्दस्य
सामग्र्यभावेमात्रस्य तादृशानुमितिसामग्रीघटकतायां प्रत्यक्षसामग्र्यभावे शाब्दसामग्र्यभावे वारेकत्र निवेशनप्रयुक्तो पदर्शितगौरवाभावेनानुगतप्रतिबध्य
प्रतिबंधकाभावकल्पनसंभवान्न अत्राप्यनुमीयते तादृशगुरुत्वानामिति विशेषणस्य प्रत्यक्षसाधारणत्वमेवाभावः न चैतत्प्रत्यक्षसाधारणत्वानुपगमे प्र
नुमित्साविशिष्टानुमितिसामग्रीकाले भिन्नविषयकप्रत्यक्षवारणाय प्रत्यक्षस्थले तादृशसामग्र्याः प्रतिबंधकत्वेन रस्यकल्पनीयतया गौरवमि
ति वाच्यं गुरुत्वाद्यनुमित्साविशिष्टगुरुत्वाद्यनुमितिसामग्रीकाले तत्समानविषयकोपनीतभानवारणायप्रतिबंधकत्वेन रकल्पनायामा
वश्यकतया तत्र समानविषयकत्वनिवेशप्रयोजनाविरहेण लघुभूतप्रत्यक्षत्वस्यैव प्रतिबध्यतावच्छेदकत्वोपगमे तत्र एव भिन्नविषयकलौकिकप्रत्यक्षादेरपि
वारणसंभवेन तादृशज्ञानेऽपि प्रत्यक्षसाधारणत्वविरहेऽपि प्रतिबध्यप्रतिबंधकभावद्वैराभावात् न च गुरुत्वाद्यनुमित्साविशिष्टवह्न्याद्यनुमितिसामग्री
प्रतिबध्यतावच्छेदकतादृशज्ञाने प्रत्यक्षव्यावृत्तत्वेनुवह्न्याद्यनुमित्साविशिष्टतदनुमितिसामग्र्याः प्रत्यक्षस्थले प्रतिबंधकताकल्पनमपि
कं तत्र समानविषयकोपनीतभानस्थलीयप्रतिबंधकतायां समानविषयकलौकिकप्रत्यक्षे व्यभिचारवारणाय लौकिकान्यत्वस्य प्रतिबध्यता
वच्छेदककोटावुपयस्यनिवेशनीयतयाततोभिन्नविषयकलौकिकप्रत्यक्षस्यवारयितुमशक्यत्वादिति तु प्रत्युक्तं निरस्तं तादृशज्ञाने प्रत्यक्षसा
धारण्येऽपि तत्र विशिष्य प्रतिबध्यप्रतिबंधकस्यावश्यकत्वात् वस्तुतस्तु ज्ञानत्वावच्छिन्नलौकिकवह्निप्रकारतानिरूपितपक्षतत्वावच्छिन्नविशेष्यतान्यप्रकार
तानिरूपितविषयतायाः प्रतिबध्यतावच्छेदकत्वमुपगम्य समानविषयकोपनीतभानस्थलीयप्रतिबंधकतायामपि लौकिकप्रत्यक्षव्यावर्तनाय गुरु
न नैवं सतिप्रतिबध्यतावच्छेदकगौरवेऽपि तादृशज्ञाने प्रत्यक्षसाधारण्यमेवोचितं न यासतिभिन्नविषयकशाब्दादिस्थलीयप्रतिबंधकतये वभिन्नवि
षयकप्रत्यक्षवारणसंभवाल्लौकिकान्यप्रत्यक्षत्वरूपलघुधर्मस्यैव समानविषयकोपनीतभानस्थले प्रतिबध्यतावच्छेदकत्वसंभवादिति वाच्यं तादृ
शज्ञाने प्रत्यक्षसाधारण्ये तु संसर्गाभावप्रतिबध्यतावच्छेदकज्ञानेऽनुमितित्वावृत्तत्वोपपत्त्याऽनुमितिस्थले बाधबुद्धेः स्वतंत्रप्रतिबंधक
ताकल्पनप्रसंगात् तदवच्छेदकगौरवस्योचितत्वादिति चेन्न समानविषयकोपनीतभानस्थलेऽनुमितिसामग्रीप्रतिबंधकतायामनुमि

ज्ञानं पर्वते वह्निप्रत्यक्षं च

नित्यप्रकारिकैवेच्छा निवेशनीया ऽनुमितिविषयकेच्छामात्रनिवेशे इच्छया पर्वते वह्निज्ञानं जायतामित्याद्याकारिकेच्छेऽनुमितिसामग्रीमुपनी
तमानसामग्रीवत ओपनीतभानानुदयप्रसंगात् ‧ तत्र च वह्निज्ञानं जायतामित्याकारकेच्छायां भ्रमवानुकूलतया ऽकिंचित्करस्यैव नाद
सत्व इव तत्त्वेऽपि प्रत्यक्षस्यैवोत्पत्त्या फलाफलापत्तेरसंभवात् ‧ एवं च तादृशज्ञाने ‥ प्रत्यक्षसत्वे ... सत्वे पर्वते वह्निज्ञानं जायतामित्याकार
केच्छाविशिष्टचन्याघनुमितिसामग्रीकाले भिन्नविषयकप्रत्यक्षवारणायानुमितिमात्र इच्छाविशिष्टानुमितिसामग्र्यास्तत्र प्रति
बंधकत्वेतरकल्पनाः ... मावश्यकमेवेति तादृशज्ञाते ‥ प्रत्यक्षसाधारण्यमावश्यकमेवेति ‧ अथ बाधबुद्ध्यादिप्रतिबन्धकतावच्छे
दकीभूते ‥ प्रत्यक्षस्यापि तत्त्वे च तस्याप्येव प्रत्यक्षस्थले प्रतिबंधकत्वेतरमिति तादृशज्ञाने ऽप्रत्यक्षत्वमापत्तत्वनुमितेन नु परोक्षत्वमा
ऽनुमितित्वाद्यत्वमितिचेत् ‧ हेतुतावच्छेदकादिभेदेनानंतानां बाधाभावादिघटितानां गुरुशरीराणां अनुमितिसामग्रीणां प्रतिबंधकत्वां
प्रत्यक्ष तरकल्पनापेक्षयैका ... बाधाभावाघटितलघुशरीरायाः प्रत्यक्षसामग्र्या बाधबुद्धेश्च प्रतिबंधकत्वांतरकल्पनास एव ... ज्ञान
नस्य लौकिकप्रत्यक्षे तद्दिद्भिन्नजनकाधबुद्धेः प्रतिबंधकत्वात् ‧ एवं प्रत्यक्षसामग्र्या बाधाभावाघटितत्वान्मितिवान्यो ... प्रत्यक्ष
हेतुत्वेऽपि समानविषयकानुमित्यादिकं प्रति प्रत्यक्षसामग्रीप्रतिबंधकताया भिन्नविषयकानुमित्यादिसामग्र्यभावानामनंतानां
निवेशात् ... सामग्र्याः पक्षतायास्तत्र लघुत्वात् भिन्नविषयकप्रत्यक्षादिसामग्र्यभावघटितायाः अनुमितिसामग्र्याः एव लघुशरीरतयास्या
एव प्रतिबंधकत्वाद्विद्यं ... इत्याहुः ‧ वह्निव्याप्यधूमवानयमित्यनुमितिप्रत्यक्षोभयसामग्रीकाले प्रत्यक्षवारणाय भिन्नविषयकप्रत्यक्षं
प्रत्यनुमितिसामग्रीप्रतिबंधकताया भिन्नविषयकानुमित्यादिसामग्र्यभावघटितायाः एव प्रत्यक्षसामग्र्यभावनिवेशादनुमितिसामग्र्या
बलाया प्रत्यक्षसामग्र्याः शरीरगौरवाभावात् ‧ यत्तु तत्तु समानविषयकपरोक्षत्वावच्छिन्ने प्रति प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्र्या एव प्रति
बंधकत्वकल्पने भिन्नविषयकानुमितिसामग्र्यभावितादृशाभावसामग्र्यभावानामेकत्र निवेशनीयतया विशेषणविनिगमनाविरहप्रसंग शिव
इति विशिष्टसामान्यविषयकानुमितित्वावच्छिन्नं प्रत्यनुमितिमात्रसामग्र्यभावाघटितायाः प्रत्यक्षसामग्र्याः पृथक् प्रतिबंधकताकल्पन १०
समानविषयकप्रत्यक्षसामग्रीप्रतिबंधकताया अपेक्षानिरहेत्ततदप्रवेशाद्बुद्ध्वाकाले तत्सामानविषयकपरोक्षज्ञानस्याप्यनुदयात् ‧ ननु